# श्रीमद्भागवते राजधर्मः

**दिनेशकुमारगर्गः**

जगत्सष्टुः सष्टेः पालनार्थं राजा परमावश्यकः, अन्यथा मात्स्यन्याय आपद्येत। वहन्मत्स्यो यथा लघु मत्स्यमश्नाति, तथैव दण्डधरा भावे सबला निर्बलान् भक्षयेयुः। एतस्मादेव कारणात् सष्टिं चिकीर्षुः ब्रह्मा प्रजारक्षणार्थं चिन्तयामास। तदानीं तस्य ('क'नामधेयस्य, कस्य) द्वेधारूपमभूत् यत्कायमिति कथ्यते। **''स्त्रीपुरुषयोः मिथुनं समपद्ययत्।''**[1] तत्र पुरुषरूपः स्वायम्भुवो मनुः, स्त्रीरूपा शतरूपा चा भूताम्। एताभ्यां मानवी सष्टिः समभूत्। तत्पालनार्थं ब्रह्मा मनुनादिदेश– **''उत्पाद्य शास धर्मेण, गां यज्ञैः पुरुषं यज।''**[2] अर्थात् धर्मपुरस्सरं पालनं कर्त्तव्यं, अथ च भगवतः परमेश्वरस्य यज्ञैरर्चनं कुर्यात्। एतस्मिन् विषये आचार्यः कौटिल्यो ब्रूते – **''अपि च मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं कल्पयासासुः, तेन भता राजानः प्रजानां योगक्षेमवहाः। ताषां किल्विषमदण्डकराहरन्ति। अयोगक्षेमवहाश्च प्रजानाम्। तस्मादुञ्छषड्- भागभारण्यका अपि निर्वपन्ति। तस्यैतद् भागदेयं यो स्मान् गोपायतीति।''**[3]

अतः प्रजारक्षणार्थं राजा वश्यम्भवेत्। स च राजा कीदशः स्यात्, तस्य स्वरूपं प्रथमं प्रतिपाद्यते – ''**राजदीप्तौ''** **इति भौवादिकधातोः ''कनिन् पुवषितक्षिराजिधन्विद्युप्रतिदिवः''**[4] इत्युनादि सूत्रात् कनिन्प्रत्यये विभक्तिकार्ये च सति राजेति निष्पद्यते। राजते शोभते दीप्यते प्रकाशते इति राजा। अर्थात् यः सुशोभितः ऐश्वर्यविभूतिभ्या दीप्तो वा भवति, अथवा ज्ञानादिना प्रजाः किं वा जगत् यः प्रकाशयति, स राजेति। अथ च दिवादि गणीयस्य ''रञ्जरागे'' इति धातोः कनिन्प्रत्यये सति राजशब्दो निष्पद्यते। रञ्यति; प्रजा अनुरञ्जयतीति राजा। महाभारते युधिष्ठिरेण पष्टो भीष्मः प्रोक्तवान् – **''रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्यते।''**[5] श्रीमद्भागवते –

**''रञ्जयिष्यति यल्लोकमयमात्मविचेष्टितैः।**
**अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः।।''**[6]

आचार्यमनुमते – ''धर्मनिष्ठः सन् यः प्रजानुरञ्जकः, स एव राजा'' इति। यथा – **''समीक्ष्य स धतः सम्यक् सर्वारञ्जयति प्रजाः।''**[7] महाकविकालिदासेनाप्युक्तम् – **''राजा प्रकतिरञ्जनात्।''**[8] इत्यादि।

अतो दीप्तिमान्, ऐश्वर्यवान्, कारुणिकः, दयादाक्षिण्यसम्पन्नः, उत्कष्टशासकः, दुष्टनिग्रहकर्त्ता, प्रजावत्सलः, प्रजारञ्जकः इत्यादि विशेषताभिः विभूषितो राजा भवति।

राज्ञो गुणाः – एतद्विषये आचार्यो याज्ञवल्क्यः स्वस्मतौ स्मरति– **महोत्साहादयो**[९] विंशतिसंख्याधिकागुणास्तत्र वर्णिताः सन्ति। राजा महोत्साहसम्पन्नः स्यात्। महान् उत्साहोयस्या सौ महोत्साहः, स च उत्साहः पुरुषार्थसाधनकर्मारम्भाध्यवसायः। स्थूलक्षः = बहुदेयार्थदर्शी, परकतोपकरापकारौ न विस्मरतियः स कतज्ञः, वद्धसेवकः = तपोज्ञानादिवद्धानां सेवकः, विनयेन युक्तः विनीतः। सत्त्व सम्पन्नः = संपदापदोहर्षविषादरहितः, माततः पिततश्चाभिजनवान् कुलीनः, सत्यवचनशीलः, बाह्याभ्यान्तरशौचयुक्तः, अक्षुद्रः = असद्गुणद्वेषी, अपुरुषः परदोषाकीर्तनशीलः, धार्मिकः = वर्णाश्रमधर्मसमन्वितः, अष्टादशव्यसनरहितः, दशकामजव्यसनानि एवमष्ट क्रोधजव्यसनानि च सन्ति।[१०] तेभ्यो विरामः। शूरः = निभर्यः, रहस्यवित् = गोपनीयार्थगोपनचतुरः, स्वरन्ध्रगोप्ता = स्वस्य सप्तसु राज्याङ्केषु यत्परप्रवेशशैथिल्यं तत्स्वरन्ध्रं तस्य प्रच्छादयिता। आत्मविद्यायामान्वीक्षिक्यां, अर्थयोगक्षेमोपयोगिन्यां दण्डनीत्यां, कषिवाणिज्यपशुपालनरूपायां वार्तायां, ऋग्यजुसामाख्यायां त्रय्याञ्च विनीतः, अर्थात् तत्तदभिज्ञैः प्राविण्यं नीतः। अत्र मनुना प्युक्तम्।[११] अत्र नराधिपपदेन् राज्याभिषिक्त एव गह्यते।

एवं विधो राजा यदा भवेत्, तदा स एव स्वीयं धर्मं पालयितुं समर्थो भविष्यति। अत्र धर्मशब्दः ''धञ्। धारणे'' इति धातोः **''अर्तिस्तु-सुहुसधक्षिमायावापदियशिनीभ्योमन्''**[१२] इत्यौणादिकसूत्रेण मन्प्रत्यये विभक्तिकार्ये सति निष्पद्यते। स्वकर्त्तव्यबोधको त्र धर्मशब्दः। श्रीमद्भगवत्गीतायाम् – **''स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।''**[१३] अपि च धर्मशब्दस्य लक्षणं भगवता व्यासेन श्रीमहाभारते लिखितम् – **''धारणाद्धर्मइत्याहुः धर्मोधारयते प्रजाः''**[१४] इति। राज्ञो धर्मः राजधर्मः। तस्य स्वरूपं भगवता मनुना सम्यक्प्रत्ययादि। अत्र राजधर्मपदे यो धर्मशब्दः दष्टादष्टार्थानुष्ठेयपरः, षाड्गुण्यादेरपिबोधकः। एवं राजशब्दः ना त्रक्षत्रियवाची, किन्त्वभिषिक्तजनपदपुरपालयितपुरुषवचनः। अतएव मनुराह – **''यथावत्तो भवेन्नपः''**[१५] यथावद् आचारो नपतिः भवेत्। अत्र राज्ञः सष्टिः कथमभूत्, मनुनोक्तम् –

**''अराजके हि लोके स्मिन् सर्वतो विद्रुते भयात्।**
**रक्षार्थमस्य सर्वस्य राजानमसजत्प्रभुः।।''**[१६]

स च राजा इन्द्रानिलयमसूर्याग्निवरुणचन्द्रकुवेरादितेजोभ्यः समुद्भूतः। अतः सामान्यनरापेक्षया महान् तेजस्वी भवति। उक्तञ्च गीतायाम् – **''नराणाञ्च नराधिपम्''**[१७] अतः तस्य कदाप्यवज्ञा न कार्या, स देवरूपो स देवरूपो भवति स राजा दण्डरूपः चतुर्णामाश्रमाणां धर्मस्य च नेता शासिता प्रतिरूपो भवति। यत्र देशे शास्त्रप्रमाणावगतः श्यामवर्णः लोहितनयनो धिष्ठातदेवता को दण्डो विचरति तत्र प्रजा व्याकुला न भवन्ति। दण्डप्रणेता चेद् विषयानुरूपं सम्यग् दण्डं जानाति। एवमपराधानुरूपं यो दण्डं ददाति, सः धर्मार्थकामैर्वद्धिं गच्छति। तस्य किं कर्त्तव्यम् – अत्रोच्यते – अनुदिनं वद्धसेवातत्परो भवेत्, अथ च तेभ्यो विनयमधिगच्छेत्। एवं विधो विनयसम्पन्नो राजा कदापि विनाशतां न प्राप्नुयात्। सदा ष्टादशव्यसनविनिर्मुक्तः सन् जितेन्द्रियी राजोभयत्र यशोभाग् भवति। मनो नुकूलान् सद्वंशपरम्परा प्राप्तान् सुपरीक्षितान् सप्त अष्टौ वा मन्त्रिणः कुर्वीत। तैः सह सप्ताङ्गराज्याभिवद्धयर्थं[१८] सन्धिविग्रहादिषाड्गुण्यविषयं चिन्तनं तेन कर्त्तव्यम्। अथ च सर्वशास्त्र–विशारदं कुलोद्गतं दक्षं शुचिमिङ्गिताकारचेष्टज्ञं दूतं कुर्यात्। दूतादेव सन्धिविग्रहौ भवितुं शक्नुतः। राजा वासार्थं षड्दुर्ग[१९]–मध्ये मनुष्यदुर्ग[२०]–स्याश्रयणं विदध्यात्। एवं सत्कुलां सल्लक्षणां सुन्दरीं भार्यामुपेयात्। राजा नानाप्रकारान् बहुदक्षिणान् अश्वमेधाधियज्ञान् कुर्यात्। तथा तत्पूर्णता वाप्तये सत्पात्रेभ्यो ब्राह्मणेभ्यः स्त्रीगहशय्यादीन् भोगान् सुवर्णवस्त्रादीनि धनानि दद्यात्। राज्ञः परमोधर्मोमनुनोच्यते –

**''संग्रामेष्वनिवर्तित्वं प्रजानाञ्चैव पालननम्।**
**शुश्रुषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम्।।''**[२१]

एवं कुर्वन्नपतिः स्वर्गमाप्नोति। अथ च ''अजितं भूहिरण्यादि जेतुमिच्छेत्, जितं प्रयत्नतो रक्षेत्, रक्षितञ्च वाणिज्यादिना वर्धयेत्। वद्धं च पात्रेभ्यो दद्यात्[२२]। अपरमपि राजधर्मं ब्रूते – राजा नित्यं हस्त्यश्वादि युद्धादि शिक्षाभ्यासात्मको दण्डो भवेत्। एवं नित्यं प्रकाशितास्त्रविद्यादिना पौरुषं यस्य सः तथा स्यात्। नित्यं मन्त्रचारचेष्टादिसंवतो भवेत्। अथ च नित्यं शत्रोर्व्यसनादिरूपच्छिद्रानुसन्धाने तत्परः स्यात्। राज्ञः क्रियाकलापं को पि न जानीयात्। किन्तु सः सर्वेषां शत्रुणां विषये वगच्छेत्। उक्तञ्चात्र–

**''ना स्यच्छिद्रं परोविद्याद्विद्याच्छिदपरस्य च**
**गूहेत् कर्मश्वाङ्गानी रक्षे द्विवरमात्मनः।।''**[२३]

सदा श्रोत्रियब्राह्मणानां रक्षैव राज्ञो परमो धर्मः। यो नेत्थं करोति, स पापभाक् भवति। तथा तस्य राष्ट्रमपि कष्टमाप्नोति। उक्तञ्च –

**''यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।**
**तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति।।''**[२४]

अतः श्रोत्रियाणां ब्रह्मवादिनां संरक्षणमवश्यमेव विधेयम्, राज्ञा सम्यग् रक्ष्यमाणः श्रोत्रियः यं धर्मं प्रत्यहं करोति, तेन राज्ञ आयुर्धनराष्ट्रानिवर्धन्ते। राज्ञः सर्वोत्कष्टधर्मः प्रजारक्षणमेव, तदभावे राजा जीवन्नपि मततुल्यो भवति, अत्र मनुनोच्यते –

**''विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः।**
**संपश्यतः सभत्यस्य मतः स न तु जीवति।।''**[२५]

अर्थात् यस्य राज्ञो मात्यादिसहितस्य पश्यत् एन राष्ट्राद् आक्रोशन्त्यः प्रजाः तस्करादिभिः ह्रियन्ते, सः मत एव, न तु जीवति। जीवनकार्याभावाज्जीवनमाथ तस्य मरणमेव। राजा सदा षड्गुणानां[२६] चिन्तनं कुर्यात्। राष्ट्रस्याभिवद्धये नित्यं सामदण्डौ प्रशंसन्ति। वस्तुतो राज्ञो नीतिः राजनीतिः सैव ययाराजानं शत्रुमित्रेदासीना राजानो यत्कार्यकरणेन न बाधेरन्।

श्रीमद्भागवते क्रमशः तत्तत्स्थलेषूपवर्णितस्य राजधर्मस्य विश्लेषणं चिकीर्षामि – तद्यथा – राजा युधिष्ठिरः राजधर्मस्य जिज्ञासया भगवता श्रीकष्णेन अनुजैश्च सह राजधर्ममर्मज्ञं श्रीभीष्मपितामहं प्रति गतवान्। तत्र गत्वा भिवाद्य, अनेकविधान् प्रश्नान् पर्यप्रच्छैत्[२७] – तत्र राजधर्मस्य वर्णनं तेन कतम् – संक्षेपतः तस्य वर्णनमिह क्रियते –

**''राज्ञां वै परमोधर्म इति धर्मविदो विदुः।**
**महात्तमेतं भारञ्च मन्ये तद्ब्रूहि पार्थिव।।''**[२८]

एवं श्रुत्वा श्रीभीष्मः भगवन्तं प्रणम्य युधिष्ठिरं प्रति राजधर्मवर्णयामास। दैवतानि ब्राह्मणांश्च पूजयित्वा राजा स्वधर्मस्यानण्यं याति। यथा तस्य लोके प्रतिष्ठा भवति। यद्यपि कार्यसिद्धौ प्रारब्धं पुरुषार्थञ्चोभे साधारणे कारणे भवतः, तथापि तत्र पुरुषार्थमेव प्राधान्यम्। यदि कदाचिद् विपदायाति, तदा संतापं मा कथाः, किन्तु आत्मानं पुरुषार्थे एव नियोजयेत्। अयमेव राज्ञां परमो नयः। राजा सत्यनिष्ठो भवेत्, सत्यादते किञ्चिदपि तस्य सिद्धिकरं ना स्ति। सत्ये निरतः सः ऐहिकं

पारलौकिकञ्च सुखमाप्नोति। यो राजा गुणवान्, शीलवान्, जितेन्द्रियः, सुदर्शनीयः, उदारचेता भवति, स कदापि राजलक्ष्म्या न **भ्रश्यते**। राजा यथावसरे मदुः तीक्षणश्च भवेत् अन्यथा केवलो मदुः तिरस्कतः स्यात्, अथ च अतितीक्ष्णस्वभावात् प्रजा उद्विग्ना भवन्ति। राजा सदा ब्रह्मण्यो भवेत्। कतापराधो पि ब्राह्मणः कदापि न हन्यते। महाभारतोक्तम् – **''विधीयते न शारीरं दण्डमेषां कदाचन्।''**[२९] तस्य परित्याग एव बधः। षड्दुर्गमध्ये राज्ञो नदुर्गे एव वासो भवेत्। चातुर्वर्ण्ये समानभावनया सदा दया कार्या। प्रत्यक्षानुमानोपमानैः स्वे परे के सन्ति सदा परीक्षणीयाः। सदा समस्तानि व्यसनानि राजा परित्यजेत्। एते मदीया एते परे इति भावनारहितो राजा भवेत्, यल्लोकाहितं भवेत् तदेव सः कुर्यात्। राज्ञा कदा पि सेवकैः सह परिहासो न विधेयः। अन्यथा ते तस्या वज्ञां करिष्यति। राजा सततोद्योगशीलो भवेत् अन्यथा स न प्रशस्यते। अत्रोच्यते –

**''द्वाविमौ ग्रसते भूमिः सर्पो वित्नसयानिव।**
**राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनाम्।।''**[३०]

अतो राजा सदा सप्ताङ्कस्य राज्यस्य परिवर्धनार्थं यतेत् तद्विपरीतं यदि को प्याचरति, स गुरु मित्रं वा भवेत्, अवश्यमेव हन्तव्यम्। गुरुरपि चेत् कुमार्गगामी तस्य निग्रहो राज्ञा कार्यः, एषः सनातनो विधिः। यथा – राजा सगरेण पौरद्वेषी असमञ्जसनामकः पुत्रः परित्यक्तः, उद्दालकर्षिणः तपस्वीपुत्रः श्वेतकेतु ब्राह्मणविरोधित्वात् संत्यक्तः। अतो राजा सदा प्रजारञ्जनं कुर्यात्। उक्तञ्च – **''लोकरञ्जनमेवा त्र राज्ञां धर्मः सनातनः।''**[३१] प्रजानां धर्मसांकर्यात् रक्षा विधेया। उक्तञ्च –

**''चातुर्वर्ण्यस्य धर्माश्च रक्षितव्या महीक्षिता।**
**धर्मसंकररक्षा च राज्ञां धर्म सनातनः।।''**[३२]

को स्ति श्रेष्ठतमोराजा, अत्रोच्यते – यथा पुत्राः पितुर्गेहे निर्भया विचरन्ति, तथैव यस्य देशे प्रजाः चोरादिकष्टकरहिता निर्भया निवसन्ति, स एव श्रेष्ठतमो राजा भवति, अपि यस्य राज्ये।

राज्यनिवासिनः पौराः स्वीयं गोप्यं धनं गोप्यस्थाने न क्षिपन्ति, पौरा नयापनयवेत्तारः सन्ति, स एव श्रेष्ठतमो राजा भवति। यस्य राष्ट्रे प्रजानां मध्ये कूटं, कपटं, ईर्ष्या, माया इत्यादि दोषाः न सन्ति तदेव राष्ट्रमुन्नतिपथं याति, तस्य राष्ट्रस्यैव राजा सर्वथा प्रशंसनीयः।

श्रीमद्भागवतस्य चतुर्थस्कन्धे भगवता व्यासेन राज्ञः पथोः स्वधर्मपालनविषये प्रतिपादितम् –

**''एवं धर्मभतां श्रेष्ठो लोकं धर्मे नुवर्तयन्।**
**गोप्ता च धर्मसेतुनां शास्ता तत्परिपन्थिनाम्।।''**[३३]

भगवदवतारभूतो राजा पथुः धर्मधारिणां मध्ये श्रेष्ठतम आसीत्, स च लोकान् स्वे – स्वे धर्मे नियोज्य धर्ममर्यादायाः रक्षां विधास्यति, कुमार्गिणो दण्डियिष्यन्ति। एकाक्येव काले–काले प्रजानां पालनपोषणानु–रञ्जनादिभिः कार्यैः कार्यानुरूपं विविधानां लोकपालानां स्वरूपं धारयिष्यति। सः सूर्यवद्, यथा भगवान भास्करो ष्टमासान् यावत् तप्त्वा पथिव्याः जलं निकष्टा पश्चात् वर्षति, तथैव राजा करादिभिः धनान्युपादाय प्रजानां संरक्षणादिना हितं करिष्यति। एवं भूतः पथुनामा राजा भविष्यति।

श्रीमद्भागवतस्य पञ्चमस्कन्धे वर्णितमस्ति, यत् तदानीन्तनो राजा एतादक् तपस्वी भवति स्म, यत् स्वतपसैव प्रजाः दुखेभ्यो निवर्तयितुं सक्षम आसीत्। एकदा[३४] इन्द्रः सत्त्वादिसमस्तगुण सम्पन्नस्य भगवतो नाभिनन्दनस्य ऋषभस्य राज्ये यदा न ववर्ष, तदवर्धाय सः योगेश्वरः प्रहस्य आत्मयोगमायया स्ववर्षमजनाभं (भारतवर्षं) नाम अभ्यवर्षत्। एवं विविधिप्रकारेण प्रजानानुरञ्जनं कतवान्।

सत्तमस्कन्धे राज्ञो धर्मस्य निरूपणावसरे श्रीनारदो युधिष्ठिरं प्रोक्तवान् – **''राज्ञो वत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः।''**[३५]

अर्थात् प्रजानां परिपालकस्य राज्ञः का जीविका भवेत्, तदुच्यते – ब्राह्मणान् परित्यज्या – न्यवैश्यादिवर्णेभ्यः करग्रहणेन राजा स्वीयं जीवनं यापयेत्।

एकादशस्कन्धे भगवान् नारायण उद्धवं प्रति राजधर्मविषये वोचत् –

**''सर्वाः समुद्धरेद् राजा पितेव व्यनात् प्रजाः।**
**आत्मानमात्मना धीरो यथा गजपतिर्गजाम्।।''**[३६]

अर्थात् – राजा पिता इव सर्वाः प्रजाः कामजक्रोधजादिव्सनेभ्यः समुद्धरेत्। तथा धीरः (धैर्यसम्पन्नः सन्) आत्मानम् आत्मना समुद्धरेत्। यथा– गजपतिः = महान् गजोः गर्तपतितान् अन्यान् गजान् समुद्धरति, तथैव, राजोक्तदोषेभ्यः प्रजानामुद्धारं कुर्यात्, एवं कते सति किं भवति, तत्र को लाभः, तदग्रे कथ्यते –

**''एवं विधो नरपतिर्विमानेनार्कवर्चसा।**
**विधेयेहाशुभं कत्स्नमिन्द्रेण सह मोदते।।''**[३७]

अस्यायम्भावः – एवं विधो नरपति राजा इह जन्मनि एवं कत्सनं = सम्पूर्णं, अशुभं = प्रतिबन्धकं पापं, विधूय = निरस्य, अर्कस्य = सूर्यस्य इव वर्चस्तेजः प्रकाशो यस्य एतादशेन विमानेन स्वर्गं गत्वा इन्द्रेण सह स्वर्गसुखमवाप्नोति।

राजधर्मस्य पालनाभावे का स्थितिः स्याद्राष्ट्रस्य, अत्र विधर्मिणां वेनादिराज्ञां कार्यप्रणालीं निरूप्यते – चतुर्थेस्कन्धे पापात्मने वेनस्य कथा स्ति – अङ्गनाम्नो राज्ञो मत्युपुत्र्याः सुनीथायाः गर्भात् समुत्पन्नो वेनेतिनामा राजा सीत्। मातापित्रोरुभयोः वंशानुगतधर्म सन्ततावायाति, अतो राज्ञः कुलीनता त्यावश्यकी। वेनो धर्ममार्गानुसारिणः स्वीयमातामहस्यानुगाम्यासीत्। अतो बाल्यकालादेव क्रूरकर्मा प्रजापीडकश्चा सीत्। स्वसुतस्य दुष्कर्माण्यवलोक्य लोकापवादभयात् राज्यं परित्यज्यवनमगात्। राज्यरक्षका भावे प्रजाः पशुतुल्यकर्मरताः सञ्जाताः। तदवलोक्य ऋषयस्तदीयमातुः सुनीथाया आज्ञां नीत्वा, वेन राज्यपदे भिषिक्तवन्तः। नपासनमधिगत्य महान् उच्छ्रङ्खलो जातः। अधार्मिकत्वाद् राज्ये भेरीघोषेण सर्वान् धर्मं न्यवारयत्। तद् यथा –

**''न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित्।**
**इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः।।''**[३८]

यस्य राज्ञो राष्ट्रे सदाचारिणस्तप्यन्ते, दुराचारिणः समद्धा भवन्ति, तद्राष्ट्रं क्षेमं न विन्दति। अहंकारसम्पन्नो राजा आत्मनमेव भगवान् मनुते। यदा राजा निरङ्कुशद्विप इव सर्वान् त्रासयति, तदा संसारात् निरपेक्षाः तपसिरतामुनयो पि उद्विग्ना भवन्ति। वेनो यदा कुमार्गेरतो भूत्, प्रजा अपि न तथा भवेयुरिति विचार्य मनसि जातकोपः ऋषयः भगवन्निन्दारतत्वात् पूर्वमेव मरणं प्राप्ताय तस्मै शापमदात्, यतः स्वप्राणान् जहौ। एवमन्ये पि कुपथानुसारिणः प्रजाविद्वेषिणः कंसादयो भूपाला अपि स्वपापादेव विनाशतां प्राप्ताः।

अतो ब्रह्मणो वचनानुसारं – ''प्रजायाः सेवा भगवतः सेवा। उक्तञ्च– **''परं शुश्रूषणं मह्यं स्यात् प्रजारक्षया नप।''**[३९] येनोपायेन प्रजाः सुखिन्यः स्युः, तत्कर्मैव राज्ञा विधातव्यम्। यस्य राष्ट्रस्य राजा सत्त्वादिगुणसम्पन्नो भवति, तदेव राष्ट्रमुन्नतिपथं याति। अन्यथा अविवेकी विशेषवर्गं प्रति समर्पितो राजा राष्ट्रं विकासपथं नेतुं समर्थो न भवति। यत्र परस्परं सुमतिर्ना स्ति, तत्र सम्पदां वासो न भवति। सुसमद्धये राष्ट्रोन्नत्यै च सर्वे सुमनसो समधियश्च भवन्त्विति। **।।इतिशम्।।**

## संदर्भ - सूची

[१] श्रीमद्भागवते – ०३/२२/५२
[२] तत्रैव – ०३/१३/२३
[३] कौटिल्य अर्थशास्त्र – ०१/१३/०६
[४] उणादिसूत्रम् – ०१ – १६२
[५] महाभारते शा. – ५६/१२५
[६] श्रीमद्भागवते – ०४/१६/१५
[७] मनुस्मतौ – ०७/२६३
[८] रघुवंशमहाकाव्ये – ०४/१२
[९] याज्ञ. स्म. आचार. – ३०६ – ३१२ =

= महोत्साहः स्थूललक्षः कतज्ञो वद्धसेवकः।
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः।।
अदीर्घसूत्रः स्मतिमानक्षुद्रो परुषस्तथा।
धार्मिको वसनश्चैव प्राज्ञः शूरो रहस्यषित्।।
स्वरन्ध्रगोप्ता न्वीक्षिक्यां दण्डनीत्यां तथैव च।
विनीतस्त्वथ वार्तायां भय्यां चैव नराधिपः।।

[१०] कामजव्यसनानि –

"मगया क्षो दिवास्वप्नः परिवादः स्त्रियोमदः।
तौर्यत्रिकं वथाट्या च कामजो दशको गणः।।

क्रोधजानि –

पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजं च पारुण्यं क्रोधजो पि गणो एकः।। (मनु. – ०७/४७–४८)

[११] त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिक्यां चात्मविद्भ्यो वार्तारम्भांश्च लोकतः।। (मनु. – ०७/४३)
[१२] औणादिकसूत्रम् – १३७
[१३] श्रीमद्भगवद्गीतायाम् – ०३/३५
[१४] श्रीमहाभारते शान्तिपर्वणि – २०६/२२
[१५] मनुस्मतौ – ०७/०१
[१६] तत्रैव – ०७/०३
[१७] श्रीमद्भगवद्गीतायाम् – १०/२७
[१८] सन्धिं च विग्रहञ्चैव यानमासनमेव च।
द्वैधिभावं संश्रयं च षड्गुणांश्चिन्तयेत् सदा।। (मनु. – ०७/१६०)
[१९] धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्।। – (मनु. – ०७/७०)
[२०] मनुष्यदुर्गं दुर्गाणां मनुः स्वायम्भुवो ब्रवीत्। – (मनु. – ०७/०६)
[२१] मनुस्मतौ – ०७/८८

[२२] तत्रैव – ०७/६६
[२३] तत्रैव – ०७/२०५
[२४] तत्रैव – ०७/१३४
[२५] तत्रैव – ०७/१४३
[२६] तत्रैव – ०७/१६०
[२७] श्रीमद्भागवते – ०१/०६/२५–२७
[२८] श्रीमहाभारते शान्तिपर्वर्णि – ५६/०२
[२९] तत्रैव – ५६/३३
[३०] तत्रैव – ५७/०३
[३१] तत्रैव – ५७/१२
[३२] तत्रैव –५७/१५
[३३] श्रीमद्भागवते – ०४/१६/०३
[३४] तत्रैव – ०५/०४/०३
[३५] तत्रैव – ०७/११/१४
[३६] तत्रैव – ११/१७/४५
[३७] तत्रैव – ११/१७/४६
[३८] तत्रैव – ०४/१४/०६
[३९] तत्रैव – ०३/१२/१२

*व. प्राध्यापक:, प्रा. राजशास्त्रार्थशास्त्रीविभागे*
*सम्पूर्णानन्द संस्कत विश्वविद्यालये;*
*वाराणस्याम्*

———ooo———